पा· ः।।श्रीगणेशायनमः ब्राह्मेमुहूर्त्तेउत्थायस्वगिरसिगुरु
१ स्मरणेस्मृत्वातन्निर्गतामृताधारयास्वशरीरंप्लुतंविधाय्य
नमोस्तुगुरुवेतस्मैइष्टदेवस्वरूपिणे यस्यवाग्मृतंहं
तिविषंसंसारसंज्ञकं इतिगुरुंनत्वा प्रातःप्रबोधितोदै
वपार्वतिशचयत्वया यद्यत्कार्यंसीतानंतत्करोमित्व
दाज्ञया १ इतिप्रार्थ्य समुद्रमेखलेदेविपर्वतस्तनमं
डले विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे इतिभु·
विंप्रार्थ्य श्वासानुसारेणपादंनिधायोत्थायकृत्वाव॰ १

श्यकसकलक्रियः लक्ष्मीकामदेवायसर्वजनप्रियायन
मः इतिमंत्रेणदंतधावनंकृत्वावैदिकंस्नानंकृत्वातां
त्रिकंकुर्यात् तद्यथा जलेत्रिकोणंकृत्वा गंगेचयमु
नेचैवगोदावरीसरस्वती नर्मदेसिंधुकावेरीजलेस्मि
न्सन्निधिंकुरु १ इतितिर्थान्यावाह्य ऊंसमुद्रयाशी
रसिजलंक्षिप्त्वाःआचम्यवाससीपरीधायाचम्यतिलकं
कृत्वा अर्घ्यपात्रेजलमापूर्य्यपुष्पादिकंक्षिप्त्वा ॐ
ह्रींह्रींसःश्रीसूर्यायप्रकाशशक्तिसहितायएषतेऽ

पा· र्घः स्वाहा इतिसूर्यार्घंदत्वा देवतालयमागत्य आधा
२ · रशक्तेनमः कूर्मायनमः पृथिव्यैनमः इतिसंपूज्य
आसनमास्तीर्य पृथिवत्वयाधृतालोकादेवित्वंविष्णुना
धृता त्वंधारयमांदेविपृथिवित्वंकुरुचासनं १ इत्या
सनंसंपूज्य तत्रपद्मासनेनोपविश्य तीक्ष्णादंष्ट्रम
हाकायकल्पानंदहनोपमा भैरवायनमस्तुभ्यंअनु
ज्ञांदातुमर्हसि १ इतिभैरवानुज्ञांलब्ध्वा छेटिकादि
ग्रंथनंकुर्यात् संध्यांकृत्वाआचम्य श्रद्यादित्रयोगं २

कृत्वापार्थिवपूजनमहंकरिष्ये अपवृतशुद्धिं कुं
डलिनीपरमशिवस्थलेजीवनमहनीत्वावामकुक्षौपापपुरु
षध्यात्वा इडयायंबीजंषोडशवारंजपन्तंशोषयेत्
ततोऽग्निकेनरंबिजंचतुषष्टिवारंजपन्तंदहेत् ततो
वंबीजंद्वात्रिंशवारंजपन्तं पिंगलयानुस्रंनिःसार्यदे
हंशुद्धिंविधाय कुंडलिनीं चामृतशीकरैःशरीरंसंत
र्पयंतंजीवंस्थानेनयेत् इतिभूतशुद्धिं अपप्राण
प्रतिष्ठां हरिहस्तंदत्वा प्रार्थनांकुर्यात् लंवशंषंस

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पा ३ हंक्षंसः ममजीवइहस्थितः आंक्रींक्रोंयंरंलंवंशंषंसंहंक्षंसः
मममवाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणाःइहागत्यचिरंसु
खंतिष्ठंतुस्वाहा इतित्रिवारंपठेत् इतिप्राणप्रतिष्ठा
आत्मतत्वायस्वाहा विद्यातत्वायस्वाहा शिवतत्वाय
स्वाहा इत्यन्तर्मातृकान्यासंकुर्यात् तद्यथा अस्य
श्रीमातृकान्यासस्यब्रह्मात्मऋषिर्मस्तके गायत्रिछंदोमु
खे मातृकादेवताहृदये हलोबीजानिदक्षस्तने स्व
राःशक्तयःवामस्तने क्षंकीलकंपादयोः मातृकान्या ३

सेविनियोगः अंकंखंगंघंङंआंअंगुष्ठाभ्यांनमः हृद
यायनमः इंचंछंजंझंञंइंतर्ज्जनीभ्यांनमः शिरसेस्वा
हा उंटंठंडंढंणंऊंमध्यमाभ्यांनमः शिखायैवषट् एं
तंथंदंधंनंऐंअनामिकाभ्यांनमः कवचायहुं ओं पं
फंबंभंमंऔंकनिष्ठिकाभ्यांनमः नेत्रत्रयायवौषट् अं यं
रंलंवंशंषंसंहंलक्षंःअःकरतलपृष्ठाभ्यांनमः अस्त्रा
यफट् इतिकरषडंगंकृत्वाध्यानंकुर्यात् हंक्षंसंव
णमयोत्रिनेत्रांसुकृशोदरां वरदाभयकपुस्तमक्ष

मालाधरांनजे १ शिरसिश्रंनमः मुखेश्रांनमः दक्ष
नेत्रेइंनमः वामेईं दक्षकर्णेउं वामेऊंनं दक्षनासी
कायांऋं वामेॠं दक्षकपोलेलं वामेऌं ऊर्ध्वरो
ष्ठें अधोरोष्ठेऐं ऊर्ध्वदंतपंक्तेओं दक्षबाहुमूलेकं नं
मः कूर्परेखंनमः मणिबंधोगंनमः अंगुलीमूलेघं
नमः अंगुल्यग्रेउंनमः वामबाहुमूलेचंनमः कूर्प
रेछंनमः मणिबंधेजंनमः अंगुलीमूलेझंनमः अंगु
ल्यग्रेञंनमः दक्षपादमूलेटंनमः जानुनिठंनमः गु ध

ल्फेडंनमः अंगुलिमूलेढंनमः अंगुल्यग्रेणंनमः
वामपादमूलेतंनमः जानुनिथंनमः गुल्फेदंनमः
अंगुलीमूलेधंनमः अंगुलीग्रेनंनमः दक्षपार्श्वेपं
नमः वामफंनमः पृष्ठेबंनमः नाभौभंनमः हृद
येमंनमः दक्षांसेयंनमः दक्षांसेरंनमः ककुदिलं
नमः वामांसेवंनमः हृदयेदक्षबाहुपर्यंतशंनमः
वामबाहुपर्यंतषंनमः दक्षबाहुपर्यंतक्षंनमः ब्र
ह्मरंध्रपर्यंतक्षंनमः मातृकान्यासः रुद्राक्षधार

पा॰ णंकृत्वाविभूतिधारणंकुर्यात् भूर्भुवःस्वरितिगृहीत्वाघ्रा
५ णंवेनसंमर्दनंशिरःपरितोभ्रामयित्वा प्रथमंअधोरेखा
अनाभिकाया ॐतत्सवितुर्वरेण्यंमितिमंत्रेणद्वितीया
रेखांतर्जन्या नगोदेवस्यधीमहीइतिमंत्रेणतृतीया
रेखांगुष्ठेनधियोयोनःप्रचोदयात् इतिविभूतिधारणं
मूलेनघ्राणायामंन्यसेत् अस्यश्रीपार्थिवेश्वरार्चि
तामणिमंत्रस्यनिग्रहानुग्रहकर्त्रिब्रह्मऋषिर्मस्तके
कामधुगागायत्रिछंदोमुखे श्रीपार्थिवेश्वरचिंताम ५

णिदेवताहृदये ह्रौंबीजंगुह्ये ह्रींशक्तिःपादयोः नमः
कीलकंसर्वांगे ममचतुर्विधफलप्राप्त्यर्थेजपेविनि
योगः अथकरषडंगन्यासः ॐह्रौंह्रींभूंसःसर्वत
श्शिवायअंगुष्ठाभ्यांनमः ॐह्रौंह्रींभूंसःसर्वतश्शिवा
यतर्जनीभ्यांनमः ॐह्रौंह्रींभूंसःअनादिबोधशिवा
यमध्यमाभ्यांवषट् ॐह्रौंह्रींभूंसःस्वतन्त्रशिवा
यअनामिकाभ्यांहुं ॐह्रौंह्रींभूंसःनित्यमलुप्तशि
वायकनिष्ठिकाभ्यांवौषट् ॐह्रौंह्रींभूंसःअनंतश

पा· क्लिं शिवाय वायकरतलपृष्ठाभ्यां फट् एवं हृदयादि
६ इति करषडंगन्यासः अथ ध्यानं कर्पूरगौरं करुणा
वतारं संसारसारभुजगेंद्रहारं सदावसंतहृदयारविं
देनवंनवानिसहितंनमामि १ वंदेमहेशंसुरसिद्धसे
वीतंनकुंभेःपूजितपादपद्मवं सुखप्रदंलक्ष्मजने
श्रवंदितंध्यायछिवंकामदुघंप्रसन्नं २ योयोगमा
यांहरत्वपुसांज्ञानविधौकिलवस्तुनिष्ठं तंविश्व
नाथंकलिकल्मषघ्नंध्यायेच्छिवालिंगितहृष्टदेहं ६

---

३ इतिध्यानं आत्मशिरसिपुष्पंदत्वाशिवरूपमात्मा
नंभावयेत्ततोन्यासंकृत्वा गुह्यातिगुह्य० इतिमंत्रेण
संकल्पंकुर्यात् ततोजलेनत्रिकोणंकृत्वातत्राधारमु
त्कामूलेनसंपूज्यकलशंमुत्कामूलेनपूर्य गंगेचय
मुनेचैव० इतितीर्थान्यावाह्य तत्पुष्पादिकंक्षिप्त्वा
शंखमुद्रांकुंभमुद्रांप्रदर्शधेनुमुद्रयाअमृतीकृत्यमू
लेनजपेत् इतिकलशस्थापनं विघ्नेशार्घस्थापनं
कुर्यात् ततस्तृतीयंपात्रंपाद्यअर्घ्यमधुपर्कआचम

नार्थंसिस्नापयेत् संशोध्य लांपृथिव्यैनमइतिअङ्गुष्ठ
देत्रान्मृदमानीय वंनमइतिजलेनासिंच्यलिंगकरणं
योगंविधाय आदौ ह्रीं ग्लौंगंगणपतयेगंग्लौं ह्रीं अने
नमंत्रेणबालकगुणंकुर्यात् ॐ ह्रौं ह्रीं जूंसः हरा
यनमइतिमृत्कृहणं ॐ ह्रौं ह्रीं जूंसः महेश्वरायनमः
संघटनं दुर्गायैनमइतिवामेगोलिकांयाप्य ॐ
ह्रौं ह्रीं जूंसः शिवायनमइतिनंदुलैः पुज्यपीठोपरि स्था
पयेत् अनंतरंएंहुंस्त्रौं क्लीं कुमारायनमइतिमंत्रेण ७

कुमारंकुर्यात् ॐ मंडूकादिपरतत्वांतपीठदेवताभ्यो
नमः इतिसंपूज्य पुनैः शैवपीठदेवताभ्योनमइत्य
भिसंपूज्य ततःपुष्पांजलिमादायमूलेनपवनश्वास
नामागेणदेवमंजलावावाह्य स्वामिसर्वज्ञनि
त्यातृप्तावत्पूजावसानकं तावत्वंप्रीतिभावेनलिंगे
स्मिन्सन्निधिंकुरु १ इतिमंत्रेणतंपुष्पांजलिंलिं
गोपरिक्षिप्त्वातत्रप्राणप्रतिष्ठांकुर्यात् आदौ
पुष्पाक्षतैःकृत्वागणपतिमंत्रपठित्वागणायतेः

प्राणाःइहप्राणाः पुनःमूलेनगणपतेःजीवइहस्थितः
मूलेनगणपतेःसर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रजिह्वा
घ्राणप्राणाइतिमुहूर्तंसुखंचिरंतिष्ठंतुस्वाहा ॐश्रां
ह्रीक्रोंयंरलवंशंषंसंहंक्षंसोहंपिनाकपाणेःप्रा
णाःइहप्राणाः श्रांह्रीक्रोंयंरलवंशंषंसंहंक्षंसः
सोहंपिनाकपाणेवाङ्मनस्त्वक्चक्षुःजिह्वाश्रोत्रघ्रा
णप्राणाइहागत्यचिरंसुखंतिष्ठंतुस्वाहा इतित्रि
वारंपठेत् आवाहनमुद्राःप्रदर्श्य ॐह्रींह्रूंसःशू

लपाणयेइत्यावाहनं एवंकुमारमंत्रस्यकुमारावाह
नं आवाहितोभव स्थापितोभव सन्निहितोभव
सन्निरुद्धोभव सुमुखीकृतोभव अवगुंठितोभव
सकलिकृतोभव अमृतीकृतोभव इतिमुद्राःप्र
दर्श्य गणपतिमंत्रेणगणेशस्यादिआसनंकुर्यात्
ॐह्रींह्रूंसःशूलपाणयेनमः आसनंसमर्पया
मि ॐह्रींह्रूंसःशूलपाणयेनमः पाद्यंसमर्पयामि
एवंअर्घ्यंसमर्पयामि मधुपर्कं० आचमनं०

पयस्नानं दधिस्नानं मधुस्नानं घृतस्नानं शर्करास्नानं क्षी
रोदकस्नानं हिरण्योदकस्नानं सप्तोदकस्नानं गन्ध
स्नानं ॐ ह्रीं नमः पिनाकपाणयेनमः स्नानं अभिषेक
ॐ ह्रीं नमः पिनाकपाणयेनमः वस्त्रं ॐ ह्रीं पिनाक
पाणयेनमः यज्ञोपवीतं ॐ ह्रीं० शिवायनमः चंदनं
पुष्पं धूपं दीपं नैवेद्यं मुखवासतांबूलंदत्वा आव
र्णार्चनानुज्ञांप्रार्थ्य आवर्णपूजांकुर्यात् हृल्लेखायै
नमः गगनायैनमः रक्तायैनमः करालिकायैन

MEMORIAL

मः महोष्मायैनमः अणिमासिद्धिं इतिप्रथमाव
र्णं क्षेत्रपालायनमः दिगंबरायनमः चंडेशायन
मः दुर्गायनमः षण्मुखायनमः नंदिनेनमः विघ्ने
श्वरायनमः सेनापतयेनमः इतिद्वितियावर्णं
ब्राह्म्यैनमः माहेश्वर्यैनमः कौमार्यैनमः वैष्णव्यैन
मः वाराह्यैनमः ऐंद्र्यैनमः चामुंडायैनमः महा
लक्ष्मैनमः इतितृतीयावर्णं लंबोदरायनमः रुद्रा
येनमः यंयमायनमः क्षंनैऋतेनमः वंवरुणाय

नमः सवायवेनमः सोमायनमः हंईशानायनमः
१० ब्रह्मणेनमः हींविष्णवेनमः इतिचतुर्थावर्णं
वज्रायनमः शक्तयेनमः दंडायनमः खड्गायन
मः पाशायनमः अंकुशायनमः गदायेनमः
त्रिशूलायनमः पद्मायनमः चक्रायनमः इति
पंचमावर्णं इत्याद्यावरणानिसंपूज्य ॐशर्वायक्षि
तिमूर्त्तयेनमः पूर्वे ॐभवायजलमूर्त्तयेनमः द
क्षिणे ॐरुद्रायअग्निमूर्त्तयेनमःउत्तरे ॐउग्रा १०

यवायुमूर्त्तयेनमःवायव्ये ॐभीमायआकाशमूर्त्त
येनमःपश्चिमे ॐपशूपतयेयजमानमूर्त्तयेनमः
नैरुत्ये ॐमहादेवायसोममूर्त्तयेनमःदक्षिणे ॐ
ईशानायसूर्यमूर्त्तयेनमःआग्नेया मध्येशीवायन
मः इतिसंपूज्य प्राणालिकाउमादेव्यैनमः पुनः
चंदनादिकंदद्यात् चंदनमलयोत्पन्नमनर्घंतिसुशी
तलं कर्पूरागरुकस्तुरीहिमांबुसंमिश्रितंशुभं १ प
रमानंदसौरभ्यपरिपूर्णदिगंतरं गृहाणपुष्पगं

धत्वंकुपयापरमेश्वर २ इतिचंदनमंत्रः गुणवंध
नसंयुक्तंनानागंधमनोहरं आनंदसौख्यंपुष्पंगृह्ण
णपरमेश्वर ३ इतिपुष्पं क्लींआमितत्तेजसेनमः
अथधूपंधत्वा वनस्पतिरसोत्पन्नोगंधाढ्योगंधमु
त्तमं आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतिधू
पं सुवर्णकांशोमहान्दीपः इतिदीपमंत्रेः नैवेद्यः
अंतर्द्धानंकृत्वा आचमनंदत्वातांबूलंदद्यात् हि
रण्यस॰ पुनःकरषडंगंकृत्वाध्यानंकुर्यात् ध्याये ११

नित्यंमहेंद्रांरजतगिरिनिभंचारुचंद्रावतंसंरत्नाक
ल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं पद्मा
सीनंसमंतात्स्तुतिमरगणैर्व्याघ्रकृत्तिंवसानंवि
श्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं
१ ततःपरेश्वरत्रयकमलअंकुशात्रिशूल
मुद्राःप्रदर्श्य मालांप्रार्थयेत् ॐमायेमाले महा
मायेसर्वशक्तिसमन्विते चतुर्वर्गस्त्वयिन्यस्त
स्तस्मान्मेसिद्धिदाभव १ ह्रींसिद्धयेनमः इतिमा

लांसंप्रार्थ्यजपंकुर्यात् अत्रमूलमंत्रस्मरणं ॐह्रौं
ह्रींजूंसः नमःशिवायपद्मपत्रपारिजातायस्वाहा यथा
शक्तिजपित्वाजपांतमुद्राध्यानंषडंगंकरंगंकृष्यादि
कंकृत्वासंकल्पंकुर्यात् गुह्यातिगुह्यगोप्तेतिमंत्रेण
त्वंमालेसर्वदेवानांप्रीतिदाशुभदाभवशिवंकुरु
ष्वमेभद्रंयशोवीर्यंचदेहिमे इतिमालांप्रार्थ्यस्था
पयेत् अथरुद्रतर्पणं ॐनमःशिवायशिवंतर्प
यामि ॐनमोभवायभवं० ॐनमोऽग्नयेउग्रंत०- १२

ॐनमोमृडायमृडंत० ॐनमःशशिशेखरायशशिशे
खरंतर्प० ॐनमःशंकरायशंकरंतर्पयामि० नमो
विश्वरूपायविश्वरूपंत० ॐनमोविरूपायविरूपं
त० ॐनमःकपर्दिनेकपर्दिनं० ॐनमोस्त्र्यंबका
यत्र्यंबकं० ॐनमोअरान्यायअरान्यंत० इतिरु
द्रतर्पणं मूलेनआरात्रिकंकृत्वा स्तुतिंकुर्यात्
विश्वेश्वरविरूपाक्षविश्वरूपसदाशिव शरणंत्रे
वृषभेनेत्राकरुणाकरशंकर १ हरहरमहादे

वविश्वेश्वरायसर्वात्मनेनीलकं
वनमोस्तुते २ मृत्युंजयायरुद्रायविश्वरूपायतेन
मः श्रमृतेशायगर्भायमहादेवायशंभवे ३ श्र्
तोमत्तःपरोनान्यस्त्वतोनान्यःकृपाकरः इति
ज्ञात्वाचयत्कार्यंतत्कर्त्तव्यंसदाशिव ध नमश्चो
काररूपायनमोक्षरवपुधते नमोनादात्मनोतु
भ्यंनमोविंदुकलात्मने १ श्रलिंगलिंगरूपाय
रूपात्तितायतेनमः त्वंमातासर्वलोकानांत्वमे -१२

वजगतःपिता २ त्वंभ्रातास्त्वंसुहृन्मित्रंत्वंप्रियस्त्व
स्वरूपधृक् त्वंगुरुःत्वंगतिःसाक्षात्त्वंपिताम्र
पितामहः ३ नमस्तेभगवंरुद्रभास्करामिततेज
से नमोभवायदेवायधर्मरूपहितायच ध स
वयक्षितिपालायसदासुरभिदेनमः पशूना
पतयेचैवपावकामिततेजसे ५ भीमायव्यो
मरूपायनावमान्नायतेनमः महादेवायसो
मायोग्रमृतायनमोस्तुते ६ उग्राययजमा

नायनमस्तेकर्मयोगिने पार्थिवानांचलिंगानांच
मयापूजनंकृतं ७ अनेनभगवान्रुद्रोवांछि
तार्थंप्रयच्छतु इतिस्तुत्वाजपंकृत्वाप्रणिपत्य
विसर्जयेत् ८ ईश्वरोवाच यःकृत्वापार्थिव
लिंगंपूजयेत्तुशतंवरिकां इहैवधनवान्भो
मानंतरूपोनिजायते ९ त्रिसंध्ययोर्चयेल्लिंग
कृत्वाबिल्वेनपार्थिवं दशकोटिकृताकयाद्वत्
स्मपुण्यफलंभवेत् १० अनेनैवस्वदेहेनरुद्र १२

लोकेवत्सो पापहासर्वमृत्यानांदर्शनस्यच
नादपि ११ प्राणयोगवियोगश्चधनयोगोवि
योगता निमिषनिमिषार्द्धवाशिघ्रताछिव
पूजन १२ इतिस्तुतिः सुखवाद्यकृत्वा पु
ष्पांजलित्रयंदद्यात् यथा अपराधसहस्रा
णिक्रियंतेहर्निशमया दासोयमितिमांम
त्वाक्षमस्वपरमेश्वर १ द्रव्यहीनंक्रियाहि
नंमंत्रहिनंचयद्भवेत् तत्सर्वंकृपयादेवसं

मस्वपरमेश्वर २ आवाहनंनजानामिनजानामी
विसर्जनं पूजांचैवनजानामित्वंगतिःपरमेश्वर
३ एतिमंत्रैपुष्पांजलित्रयंदत्वा भूमौपंचांगप्र
णमेत् भूमौपतितपादानांभूमिरेवावलंबनं
त्वद्विजातापराधानंत्वमेवशरणंविभो १ इ
तिक्षमाप्य गुरुपूजांकुर्यात् देवनाथगुरोस्
स्वामिन्नदेशिकस्तात्मनायक त्राहित्राहिक
पामिद्धोपूजांपूर्णतमांकुरु १ तस्यैदिशेसत १४

तमंजलिरेणपुष्पैःप्रक्षिप्यतेरसयुतोमधुरेद्वि
रेफैः जागद्वियत्रभगवान्गुरुस्त्वंकवतीवि
श्वोदयप्रलयनाटकसूत्रधारः १ इतिपु
ष्पांजलिक्षिपेत् ततोनैवेद्यांशईशान्यांच
ण्डायनमइतिमंत्रेणक्षिपेत् तालत्रयंदत्वा
उपसंहारमुद्रया ॐ ह्रौं ह्रौंजूंसःमहादेवा
यनमःक्षमस्वेतिविसर्जनंकृत्वा देवदेवस
मापुत्रहृदयंममशंकरः यागदेशात्समाग

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गत्यग्रविशस्वसुरेश्वरः १ मृडनांनोकृपासिधोपरा
धात्कोटिकोटिशः क्षमस्वेतिप्रणामंमेगृहाणाघ
गसंयुतं १ इत्युक्त्वाप्रणम्यजलादौक्षिपेत्
इतिपार्थिवपूजनपद्धतिःसमाप्ता श्रीरुद्रायनम
संवत१८२९ नाकारतकवद७ गुरुवासरेश्रीसिंह
पुरमद्धेरेहेवासिनटप्रेमजिसुनटनरछैजेनलि
खितंउस्त्यज्ञातिय बाईश्रीचादाबाअथेलि०
रेहेवासिमोजेरामपरना जेवांचेतेनेजेश्रीकृष्ण